## वहश्च। (६४/३४१०)

वहेर्धातोः छन्दसि [1]विषये सुबन्त उपपदे ण्विप्रत्ययो भवति। [2]प्रष्ठवाट्। दिव्यवाट्। योगविभाग उत्तरार्थः॥

## कव्यपुरीषपुरीष्येषु ञ्युट्। (६५/३४११)

[3]कव्य पुरीष पुरीष्य इत्येतेषु उपपदेषु छन्दसि विषये वहेर्धातोः ञ्युट् प्रत्ययो भवति। 'कव्यवाहनः [4]पितृणाम्' (तै. सं. २.५.८.६)। '(अग्नेः) [5]पुरीषवाहणः' (वा. सं. ११.४४)। 'पुरीष्यवाहनः' (मै.सं. २.७.४)॥

## हव्येऽनन्तःपादम्। (६६/३४१२)

हव्यशब्दे उपपदे छन्दसि विषये वहेर्धातोः ञ्युट् प्रत्ययो भवति, [6]अनन्तःपादं चेद् बहिर्वर्तते। 'अग्निश्च हव्यवाहनः' (अ. वे. ७.२०.१) अनन्तःपादम् इति किम्? 'हव्यवाडग्निरजरः पिता नः' (ऋ. ५.४.२)॥

## जनसनखनक्रमगमो विट्। (६७/३४१३)

छन्दसि उपसर्गे सुपि इति [7]अनुवर्तते। 'जन जनने' (धा. पा. ११०६), 'जनी प्रादुर्भावे' (धा. पा. ११५०), द्वयोरपि ग्रहणम्। तथा 'षणु दाने' (धा. पा. १४६५), 'वन षण संभक्तौ' (धा. पा. ४६३, ४६४), [8]द्वयोरपि ग्रहणम्। जनादिभ्यः धातुभ्यः [9]सुबन्त उपपदे छन्दसि [10]विषये विट् प्रत्ययो भवति। [11]टकारः सामान्यग्रहणाविघातार्थः 'वेरपृक्तस्य' (६.१.६७/३७५) इति, विशेषणार्थश्च विड्वनोरनुनासिकस्यात्' (६.४.४१/२९८२) इति। जन – 'अब्जाः गोजाः' (ऋ. ४.४०.५)। सन – 'गोषा [12]इन्दो नृषा असि' (ऋ. ९.२.१०)। खन – 'बिसखाः' (ऋ. ६.१.२)। कूपखाः। क्रम – '[13]दधिक्राः' (ऋ. ४.३८.१०)। गम – 'अग्रेगा [14]उन्नेतॄणाम्' (तै. सं. १.३.६.१)॥

## अदोऽनन्ने। (६८/२९७७)

छन्दसि इति निवृत्तम्। अदेर्धातोरनन्ने सुप्युपपदे विट् प्रत्ययो भवति। आममत्ति आमात्। सस्यात्। अनन्ने इति किम्? अन्नादः॥

## क्रव्ये च। (६९/२९७८)

क्रव्यशब्द उपपदे अदेर्धातोः विट् [15]प्रत्ययो भवति। क्रव्यमत्ति क्रव्यात्। पूर्वेणैव सिद्धे [16]वचनमसरूपबाधनार्थम्। तेन अण् न भवति। कथं तर्हि क्रव्यादः[17]? कृत्तविकृत्तशब्दे उपपदे अण्, तस्य च [18]पृषोदरादिपाठात् क्रव्यभावः। कृत्तविकृत्तपक्व[19]मांसभक्षः क्रव्याद उच्यते, आममांसभक्षः क्रव्यात् इति॥

---

1. विषये नास्ति क. 2. तुर्यवाट् ग. फ. 3. कव्यादिषु फ. 4. पितृणाम् नास्ति फ. 5. पुरीषवाहनः ब, मुद्रितपुस्तकेषु 6. अनन्तःपादात् ङ. 7. वर्तते क. 8. इति च इत्यधिकम् फ, द्वयोरपि ग्रहणं नास्ति अ. 9. सुबन्ते उपपदे नास्ति फ. 10. विषये नास्ति फ. 11. इकारः सामान्यग्रहणार्थः अ. ग. 12. इन्द्रो मुद्रितः पाठः 13. आदध्रिकाः शवसा पञ्चकृष्टीः ङ. 14. नेतॄणाम् ब. 15. प्रत्ययो नास्ति फ. 16. इदम् इत्यधिकम् फ. 17. इति इत्यधिकम् फ. 18. पृषोदरादित्वात् ब. क. 19. °मांसभक्षकः ब.